International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(1): 47-49
© 2026 IJMH
www.themultijournal.com
Received: 01-01-2026
Accepted: 19-01-2026
Publish : 20-01-2026

**हरिश्चंद्र मालू गवस**
शोधच्छात्रः, व्याकरण-विभागः,
कवि-कुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक-नागपूरम्

**मार्गदर्शकः**
**प्रो.हरेकृष्ण अगस्ती**
अधिष्ठाता-वेदविद्या-सङ्काय-प्रमुखः,
कवि-कुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक-नागपूरम्

**Correspondence:**
**हरिश्चंद्र मालू गवस**
शोधच्छात्रः, व्याकरण-विभागः,
कवि-कुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक-नागपूरम्

# सामवेदीय-आग्नेय-काण्डान्तर्गतम् अग्निस्वरूपम् (सायण-सुबोधभाष्याधारेण)

**हरिश्चंद्र मालू गवस, प्रो.हरेकृष्ण अगस्ती**

**भूमिका-**

चतुर्षु वेदेषु अन्यतमो वर्तते सामवेदः। भगवता श्रीकृष्णेनापि **"वेदानां सामवेदोऽस्मि"**[1] इत्येनेन वाक्येन सामः प्रशंसितः । सामवेदः, सामगानभेदात्, गानवैशिष्ट्यात् लोके प्रसिद्धः। **" सामानि यो वेत्ति स वेद तत्त्वम्"** यो हि सामाध्ययनं करोति सो वेदतत्वं जानाति। पूर्वार्चिक-उत्तरार्चिकेति भेदेन सामः द्विधा विभज्यते। सामवेदीय-पूर्वार्चिके आग्नेयं-ऐद्रम्-पवमान-आरण्यकेति चत्त्वारि काण्डानि सन्ति। ऋग्वेदात् बहवः मन्त्राः स्वीकृताः। अत एव वक्तुं शक्यते यत् सामवेदे प्रायः स्तुतिमन्त्राः सन्ति। प्रत्येकं वेदस्य भाष्यकाराः सन्ति । तेषु भाष्यकारोऽस्ति माधवः, अनेन महोदयेन सामविवरणं नामकं भाष्यं लिखितम्। भरतस्वामिनापि सामसंहितोपरि भाष्यं रचितम् । सम्प्रति भाष्यमिदं नोपलभ्यते। बाणभट्टादीनां कवीनां ग्रन्थेषु एतेषामुल्लेखः प्राप्यते। गुणविष्णुनापि सामभाष्यं विलिखितम् । सायणस्तु चतुर्वेद-भाष्यकाररूपेण विख्यातो वर्तते। अनेन आचार्येण वैज्ञानिकव्याख्यात्मकं भाष्यं कृतम्। सातवलेकरमहोदयेन सुबोधनामकं भाष्यं लिखितम्। सायणसातवलेकरमहोदययोर्भाष्यमु-पलभ्यते। आचार्यसातवलेकरवर्येण वेदप्रचारप्रसारसम्बद्धं महत्कार्यं कृतम्। अनेन चतुर्वेदसंहितानामपि प्रकाशनं कृतम् । अनयोः भाष्यकारयोर्दृष्ट्या सामवेदीय आग्नेयकाण्डान्तर्गतम् अग्निस्वरूपं विश्लेषणं क्रियते।

**प्रस्तावना**

**अग्निस्वरूपम् -** प्राचीनकालादेव अग्निः बहुभिः ऋषिभिः स्तुतः। यथा उच्यते खलु **अग्निः पूर्वेभिः ऋषिभिः**[2] इत्यादीभिः प्रमाणेन अनुमातुं शक्यते। यास्काचार्येण अग्नि इति पदस्य पञ्चनिरुक्तयः उक्ताः। यथा- **अग्रणीर्भवतीति अग्निः** अर्थात् यो हि मनुष्याणां सकलकार्येषु अग्रणी भवति। **अङ्गं यज्ञेषु प्रणीयते-** नाम यज्ञेषु सर्वप्राथम्येन अग्नेः आह्वानं क्रियते। **अङ्गं नयति सङ्गमानः** इत्युक्तौ अग्निः यद्यत् पतितानि वस्तूनि गृह्णाति स्वीकरोति। **अक्नोपनो भवति स्थौलाष्ठिविः- न क्नोपयनि न स्नेहयति वा।**[3] निरुक्तकारस्थौलाष्ठिविमतेन अयमग्निः शुष्कं करोति। यत्र तत्र प्रकाशः, ज्ञानम्, गतिः,प्रगतिः, प्राप्तिः वर्तते तत्सर्वमपि अग्निरेव । सामान्येन अङ्गति ऊद्ध्वं गच्छतीति अग्निः। वैदिककाले न कोऽपि देवताः विशिष्टासन्। अत एव कथ्यते **"यज्ञेन यज्ञम् अयजन्त देवाः तानि धर्माणि प्रथमानि आसन् ।**[4] इत्यादिभिः श्रुतिवचनात् वयं ज्ञातुं शक्नुमः, यज्ञ एव मानवानामाद्यधर्मः आसीदिति। नूतनैः विद्वद्भिरपि अयमग्निः ईड्यः। वैदिकदेवतासु अग्निः अन्यतमो मन्यते। अस्माकं जीवनस्य आरम्भः अग्निना एव भवति अन्तोऽपि दक्षिणाग्नौ भवति। वैदिकपरम्परायामस्याम् अग्नेः श्रेष्ठत्वमवलोक्यते। ऋग्वेदे, सामवेदे वा अग्निः पदेनैव मन्त्रः आरभ्यते । सामवेदस्य द्वौ भागौ ,स्तः पूर्वार्चिक-उत्तरार्चिकेति। पूर्वार्चिकभागे चत्त्वारि काण्डानि सन्ति । आद्यस्तु आग्नेयकाण्डं विद्यते। अग्निना दृष्टं साम आग्न्येयं साम इति **"दृष्टं साम"**[5] इत्यनेन सूत्रेण ढक् प्रत्ययः। अग्नेरिदम् अग्निर्देवता वास्य ढक् प्रत्ययः। अस्मिन् आग्नेय-काण्डे अग्नेः स्वरूपं प्रतिपादितमस्ति। बहुभिः प्रकारैः चतुर्दशाधिकशतमन्त्रैः अग्नेः स्वरूपं प्रतिपादितम्। यद्यपि अन्येषां देवतानामपि मन्त्राः सन्ति परमस्य काण्डस्य प्रधानदेवता अग्निरेव उच्यते । **यत् देवाः अकुर्वन् तत्**

**करवाणि**[6] यच्च देवताभिः कृतं तच्च वयमपि कुर्मः इति भावनया देवत्वसम्पादनार्थं समाजे सुशोभितः भवेदिति भावना आग्न्येय-काण्डे निरुपिताः। यथा उच्यते खलु शिवं भूत्वा शिवं यजेत। **देव-युं जन आ अय**[7] देवत्वाकाङ्क्षिणः त्वं नामाग्निं प्राप्नोः।

**१. अग्निस्वरूपम्**

**सुबोधभाष्यम्-**अग्नेर्गुणाः- विश्ववेदाः विश्वस्य ज्ञाता, सर्वज्ञानी, सर्वधनैर्युक्तः। विश्ववेदाः इति शब्दे वेद इत्यनेन धनमिति अर्थः स्वीकृतः। वेदस् इत्यनेन धनम्, जातवेदः जातं वेत्ति उत्पन्नान् जानाति यः सः जातवेदः। पुरोहितः-अग्रे तिष्ठति यः सःपुरोहितः, मनुष्याणां प्रथमः हितकर्ता अस्ति।

**सायणभाष्यम्-** विश्ववेदसं विश्वं समस्त वेदो धनं यस्यादौ विश्ववेदाः तम् सर्वविदं वा । जातवेदसं जातानां वेदितारः जातप्रज्ञानं जातधनं वा मित्रं न सखिभूतमिव प्रियमनुकूलम् । अपरेऽस्मिन् मन्त्रे **अग्ने विवस्वदा०** जातानां वेदितः, प्राणिमात्राणां ज्ञाता। **इम स्तोममर्हते०**[8] जातवेदसे इत्यत्र जातवेदसे जातानामुत्पन्नानां वेदित्रे जातप्रज्ञाय जातधनाय वा अग्नये । अरण्योर्निहितो० जातवेदाः सर्वविषय ज्ञानवान् । **ईडिष्वा हि प्रतीव्या**[9] जातवेदसम्- जात-वेदसं जातप्रज्ञं यद्वा , जातानि भूतानि वेत्तीति जातवेदाः। **उदुत्यं जातवेदसं०-** जातवेदसं जातानां प्राणिनां वेदितारं जातधनं वा द्योतमानम्। उभयोः भाष्यकारयोर्मध्ये सायणाचार्येण मन्त्रगतस्य एकस्य शब्दस्य बहवः अर्थाः प्रतिपादिताः।

**२. अग्न्येः सामर्थ्यम्-** पुरूतमः-सर्वश्रेष्ठः सर्वशक्तिषु महान् , **महान् असि०**[10] त्वत्सदृशः न कोऽपि वर्तते। कृष्टयः ओजसे ते नमः **गृणन्ति मं**[11] **सर्वे मनुष्याः शक्तिमासुं तुभ्यं नमन्ति ।**

**३. अग्नेः सूर्यस्वरूपम्-**सूर्यः द्युलोके वसति। यदाग्न्येयरूपं वर्तते तदेव आग्न्येयकाण्डे प्रतिपादिमस्ति । परो दिवि यत् इध्यते आदित् प्रत्नस्य रेतसः वासर ज्योतिः पश्यति। द्युलोके यः प्रकाशः वर्तते सः प्राचीनवीर्यस्य प्रकाशादेव प्रकाश्यते। तं प्रकाशं मनुष्याः पश्यन्ति । सूर्योदयात् प्रकाशितं तेजः महान् अस्ति । तदेव तेजरूपं मनुष्याः आकाशे पश्यन्ति ।

**४. शत्रुनाशकः अग्निः-** अस्मिन् काण्डे युद्धकौशल्यवर्णनं कृतं वर्तते। यथा- **अग्निः वृत्राणि जंघनत्** [12] अग्निः वृत्रं हन्ति। परितः, वृत्रशब्देन परितः आवरणकर्तृरुपशत्रुः इति अर्थः गृहीतः। वृत्र अर्थात् मेघः, सर्वविधरूपाः शत्रवः। अग्निः एतान् शत्रून् नाशयति। अयमग्निः **वृत्रहथानां ईशे**[13] **वृत्रहन्तमं ज्येष्ठ आनवं अग्निः अगन्म**[14] **विश्वस्य अरातेः महोग्निः पाहि**[15] **विश्पतिः रक्षसः रीषतः रक्ष**[16] अग्निस्तिग्मेन शोचिषा विश्वं अत्रिणं नियंसत्।

**५. रक्षणकर्ता अग्निः-**अग्निः शुरेषु प्रधानोऽस्ति,अयमग्निः वृत्रं हन्ति। **वृत्रहन्तः-** यः शत्रून् बध्नाति नाशयति च सः वृत्रहन्तः। शुरेष्वपि प्रमुखः तमग्निमहं प्रार्थये । तस्याश्रये अहं सन्तिष्ठामि । **रुद्रः–** त्वं शत्रून् रोदयितास्ति। अग्निः रुद्ररूपेण वर्णितः। अत्रिणम् इत्यनेन **अत्ति इति अत्रि–** अत्यधिकं भुनक्ति सोऽग्निरिति उच्यते । शास्त्रेष्वपि अग्नेः हुतभुगिति अपरा संज्ञा वर्तते। इत्यादिभिः उदाहरणैः अग्नेः रक्षणकर्तृस्वरूपं निरूपितम् ।।

**सायणभाष्यम्-** अग्ने रक्षाणो० मन्त्रेऽस्मिन् अजरः इति शब्देन जरारहितः इति अर्थः निरूपितः। हे अग्ने त्वं च अस्मान् पापात् रक्ष /पाहि तपिष्ठैः इत्यनेन अत्यधिकं स्वतेजोभिः हिंसा कुर्वन्तः शत्रून् प्रति दह -भस्मी कुरु इत्यर्थः। रक्षार्थम् अग्निः प्रार्थ्यते।

**६. धनदाता-** मनुष्यप्राणिनः नित्यं धनमिच्छन्ति। प्रत्येकं कार्ये धनस्यावश्यकता वर्तते एव। धनदातृत्वेन सामवेदे अग्निः निगदितः। **द्रविणस्युः**[17] अग्नेः उपासकाः धनं याचन्ते। **अस्मभ्यं महे ऊतये विवस्वत् आ भर १० –** अस्माकं संरक्षणार्थं बहुधनं प्रददातु। नः रयिं वंसते – सोऽग्निः एतेभ्यः धनं प्रददाति । **दाशुषे रत्नानि दधत्**[18] **सः** दानशीलजनेभ्यः रत्नानि यच्छति। अयं, अग्निः **सौभगस्य राय ईशे**[19]– अयमग्निः उत्तमैश्वर्यस्य धनस्वामी वर्तते। **अस्मे महि श्रवः** देहि -मह्यं धनं यशश्च यच्छ।

**७. यज्ञे अग्निदूतस्वरूपम्-** अध्वराणां नप्ता-अहिंसापूर्ण यज्ञकर्ता, नप्ता- न पतिता। उन्नतकर्ता हिंसारहितकर्मणः उन्नयिता। गृहपतिः- त्वं गृहपतिः न अध्वरे त्वं होता, पोता, प्रचेताश्च, त्वमेव गृहस्य स्वामी असि। अस्माकं यज्ञे देवान् आहूय, पवित्रकर्ता उत्तमचैतन्यदातास्ति । **देवेभिः मानुषे जने-** देवैः मनुष्येषु अयमग्निः स्थाप्यते। पुत्राणां रक्षार्थं अग्निं प्रार्थयन्ति मनुष्याः। हे सुक्रतो । **गिरा मम जाता पृण।** उत्तमकर्ता हे अग्ने, स्ववाचा मम पुत्रान् पौत्रांश्च पोषणं कुरु। **देवत्रा हव्यं आ ऊहिषे**[20] त्वया देवेभ्यः हविः दीयते । अग्निः दूतरूपेण यजमानेन प्रदत्ताहूतिः देवं प्रति नयति । अत एव स यज्ञस्य ज्ञेता इत्युच्यते।

**८. अग्नेःविशेषणानि-** होता, विश्ववेदसम्, अतिथिः, विवस्वत्, दूतः, हव्यवाहः, जराबोध, वारवन्तः, महान्, देव, अजरः, विश्पतिः, अङ्गिरः, वाजपतिः, कविः, जातवेदः, सत्यधर्मा, सत्पतिः, प्रियं मित्रं, पावकः, गृहपतिः, त्रातः, वयोवृधः, पुरुस्पृहः, विश्वावसु, हविष्कृतः, पुरोहितः, ब्रह्मणस्पतिः, पुरुमीढः, सुक्रतुः, विश्ववारः, अपांनपात्, वैश्वानरः, सम्राजः, गिरर्वाहः, राजा, रुद्रः, जयन्तः,

**९. आग्नेय-पर्वान्तर्गत-अग्नये प्रयुक्ताः उपमाः-**

**मित्रं इव प्रियः**[21] प्रियमित्र इव अग्निं प्रार्थय ।

**रथं न वेद्यं-**[22]

**वारवन्तं अश्वं न** [23]

**धेनुं इव** [24]

**द्यौ इव असि**[25]

**मित्रः न** [26]

**मित्रं न**[27]

**महस्य तोदस्य शरण इव-**[28]

मन्त्रेऽस्मिन् प्रयुक्तौ न, इव इत्यव्ययौ उपमानवाचकौ स्तः। निरुक्ते इव, न, चित्, नु इत्येते उपमानार्थकनिपाताः सन्ति।

**उपसंहारः**-शोधपत्रेऽस्मिन् सायण-सातवलेकरयोः भाष्यकारयोः सामवेदीय-भाष्याधारेण आग्न्येयकाण्डान्तर्गतम् अग्निस्वरूपं प्रतिपादितम् । अग्निसम्बद्धानि कार्याणि च शोधपत्रे उपस्था-पितानि। अग्नेः विविधानि कार्याणि यथा- यज्ञे अग्निदूतस्वरूपं, सामवेदस्य आदित्यदेवः प्रसिद्धः अतः अत्र अग्नेः आदित्यरूपं, सामर्थ्यवान्, रक्षणकर्तृ-धनदातृरूपञ्च उल्लिखितमस्ति। अग्नेः कृते नैकाः उपमाः प्रयुक्ताः सन्ति ताश्च अत्र प्रतिपादिताः।, एकस्य नाम्नः नैके अर्थाः सायणेन निरूपिताः सन्ति इति च दृश्यते।

**सन्दर्भाः-**

१. ***सामवेद संहिता*** **–** सायण-भाष्य-सहितम्, प्रकाशकः-चौखम्बा-विद्याभवन -वाराणसी-१९९४

२. ***सुबोधभाष्यम्-*** डॉ. श्रीपाद दामोदर सातवलेकर ,प्रकाशकः, स्वाध्याय-मण्डल-पारडी- १९८५

**पादटीका**

1. भ.गी १०.
2. ऋग्वेद १.१
3. निरुक्त
4. ऋग्वेद १०.९० १८
5. पा.सू. ४.२७
6. शत० ब्रा०
7. सामवेद संहिता.२३
8. तत्रैव
9. तत्रैव ३ ०
10. तत्रैव २३
11. तत्रैव ११
12. तत्रैव ४
13. तत्रैव ६०,
14. तत्रैव ८९,
15. तत्रैव ६
16. तत्रैव २४,
17. तत्रैव ४
18. तत्रैव ३०-
19. तत्रैव
20. तत्रैव १०९
21. तत्रैव
22. तत्रैव ५
23. तत्रैव १७
24. तत्रैव ७३
25. तत्रैव
26. तत्रैव ८३
27. तत्रैव ९९
28. तत्रैव ९७